# shrIHanumatstotram

# શ્રીહનુમત્સ્તોત્રમ્ વ્યાસતીર્થવિરચિતમ્

## Document Information

Text title : hanumatstotraM vyAsatIrthavirachitam

File name : hanumatstotraMvyAsatIrtha.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 18, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીહનુમત્સ્તોત્રમ્ વ્યાસતીર્થવિરચિતમ્

યન્ત્રોદ્ધારક હનૂમત્સોત્રમ્

નમામિ દૂતં રામસ્ય સુખદં ચ સુરદ્રુમમ્ ।
પીનવૃત્તમહાબાહું સર્વશત્રુનિબર્હણમ્ ॥ ૧॥

નાનારત્નસમાયુક્તકુણ્ડલાદિવિભૂષિતમ્ ।
સર્વદાભીષ્ટદાતારં સતાં વૈ દૃઢમાહવે ॥ ૨॥

વાસિનં ચક્રતીર્થસ્ય દક્ષિણસ્થગિરૌ સદા ।
તુઙ્ગામ્ભોધિતરઙ્ગસ્ય વાતેન પરિશોભિતે ॥ ૩॥

નાનાદેશાગતૈઃ સદ્ભિઃ સેવ્યમાનં નૃપોત્તમૈઃ ।
ધૂપદીપાદિનૈવેદ્યૈઃ પઞ્ચખાદ્યૈશ્ચ શક્તિતઃ ॥ ૪॥

ભજામિ શ્રીહનૂમન્તં હેમકાન્તિસમપ્રભમ્ ।
વ્યાસતીર્થયતીન્દ્રેણ પૂજિતં પ્રણિધાનતઃ ॥ ૫॥

ત્રિવારં યઃ પઠેન્નિત્યં સ્તોત્રં ભક્ત્યા દ્વિજોત્તમઃ ।
વાંછિતં લભતેઽભીષ્ટં ષણ્માસાભ્યન્તરે ખલુ ॥ ૬॥

પુત્રાર્થી લભતે પુત્રં યશોઽર્થી લભતે યશઃ ।
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ॥ ૭॥

સર્વથા માસ્તુ સન્દેહો હરિઃ સાક્ષી જગત્પતિઃ ।
યઃ કરોત્યત્ર સન્દેહં સ યાતિ નિરયં ધ્રુવમ્ ॥ ૮॥

ઇતિ શ્રીવ્યાસતીર્થવિરચિતમ્ હનુમત્સ્તોત્રં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*shrIHanumatstotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*